# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| कक्षा-आचार्य(SEM-१) (New) | प्रश्नपत्रम् – 4 (4) | गुणाः –70 |
| विषयः – साहित्यम् (नाट्यवर्गः) | कोड –C.C.4.1.3 | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – नाट्यशास्त्रम् – अध्यायौ १-२ | |

---

**प्रश्नः-१ (अ) अधोनिर्दिष्टाभ्यामेकस्याः कारिकायाः ससन्दर्भं व्याख्यां कुर्वन्तु।** (०५)

(१) जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥

(२) ततस्तैरसुरैस्सार्धं विघ्ना मायामुपाश्रिताः।
वाचश्चेष्टां स्मृति श्चैव स्तम्भयन्ति स्म नृत्यताम्॥

**प्रश्नः-१ (ब) ब्रह्मणा नाट्यशास्त्रस्य निर्माणं कथं कृतम् ?- सविस्तरं लिखत।** (१०)

अथवा

**साहित्यशास्त्रे भरतमुनेः किं स्थानमिति विविच्य नाट्यशास्त्रकारस्य जीवनवृत्तं लिखन्तु।**

**प्रश्नः-२ (अ) अधोनिर्दिष्टाभ्यामेकस्याः कारिकायाः ससन्दर्भं व्याख्यां कुर्वन्तु।** (०५)

(१) दृष्ट्वा नाट्यगृहं ब्रह्मा प्राह सर्वान्सुरांस्ततः।
अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डप॥

(२) न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥

**प्रश्नः-२ (ब) ग्रन्थदिशा नाट्यस्वरूपं निरूप्य नाट्यगृहस्य निर्माणविधिं निरूप्यताम्।** (१०)

अथवा

**नाट्यगृहस्य रक्षकदेवतानां नियुक्तिं वर्णयन्तु ।**

**प्रश्नः-३ (अ) अधोनिर्दिष्टाभ्यामेकस्याः कारिकायाः ससन्दर्भं व्याख्यां कुर्वन्तु।** (०५)

(१) प्रेक्षागृहाणां सर्वेषां प्रशस्तं मध्यमं स्मतम्।
तत्र पाठ्यं च गेयं च सुखश्राव्यन्तरं भवेत् ॥

(२) अत ऊर्ध्वं न कर्तव्यः कर्तृभिर्नाट्यमण्डपः।
यस्मादव्यक्तभावं हि तत्र नाट्यं व्रजेदिति ॥

**प्रश्नः-३ (ब) नाट्यगृहनिर्माणाय उत्तमानि नक्षत्राणि विलिख्य नाट्यनिर्माणे भूमियोजना-विषये सविस्तरं लिखन्तु ।** **(१०)**

अथवा

**प्रेक्षागृहस्य भेदान् विलिख्य तेषां प्रमाणानि लक्षणानि च निरूपयत ।**

**प्रश्नः-४ (अ) अधोनिर्दिष्टाभ्यामेकस्याः कारिकायाः ससन्दर्भं व्याख्यां कुर्वन्तु ।** **(०५)**

(१) पवित्र ब्राह्मणेस्तम्भे दातव्या दक्षिणा च गौः ।
शेषाणां भोजनं कार्यं स्थापने कर्तृसंश्रयम् ॥

(२) त्र्यश्रं त्रिकोणं कर्तव्यं नाट्यवेश्म प्रयोक्तृभिः ।
मध्ये त्रिकोणमेवास्य रंगपीठं तु कारयेत् ॥

**प्रश्नः-४ (ब) टिप्पणीद्वयं लिखत ।** **(१०)**

(१) आधारशीलास्थापनविधिः ।
(२) मत्तवारणी ।
(३) रङ्गशीर्षम् ।
(४) जर्जरोत्पत्तिः ।

**प्रश्नः- ५ निम्नलिखितेभ्यः दशप्रश्नानामुत्तराणि एकैकवाक्यैः लिखन्तु ।** **(१०)**

(१) नाट्यगृहस्य निर्माणाय ब्रह्मा कं कथयामास ?
(२) नाट्यशास्त्रस्य प्रथमाध्ययस्य नाम किम् ?
(३) नायकस्य रक्षणं कः करोति ।
(४) नाट्यप्रयोगाय गानयोगे के नियोजिताः ।
(५) वृत्तयः कति सन्ति ? काः च ताः ?
(६) नाट्यनिर्माणाय यजुर्वेदात् किम् स्वीकृतम् ?
(७) रङ्गपीठस्य मध्ये कः देवः प्रतिष्ठितः ?
(८) नाट्यशास्त्रस्य द्वितीयाध्यायस्य किं नाम ?
(९) वैश्यरूपः स्तंभः कस्यां दिशि स्थापनीयः ?
(१०) नाट्यमण्डपस्य रक्षणाय देहल्यां कस्य नियुक्तिः कृता ?
(११) नाट्यकर्मणि ग्रहणे धारणे प्रयोगे च के योग्याः ?
(१२) इन्द्रः कान् जर्जरीकरोति ?
(१३) वैश्यस्तम्भस्थापने ब्राह्मणेभ्यः किं दातव्यम् ?
(१४) रङ्गपीठस्य पार्श्वे किं कर्तव्यम् ?
(१५) शूद्रस्तम्भस्य मूले किं स्थापनीयम् ?